नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

No. of Printed Pages – **04**

# VU-94-Sans. Vangmay (Supp.)

## संस्कृत वाङ्मय (अनिवार्यः)

### वरिष्ठ उपाध्याय पूरक परीक्षा, 2020

**समय : 3¼ घण्टे**

**पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. “दाक्षिः” इत्यत्र कः प्रत्ययः ? **1**

2. “क्रमादिभ्यो वुन्” इति सूत्रस्य उदाहरणं लिखत । **1**

3. पतिसेवातत्परायाः स्त्रियः द्वे नामनी लिखत । **1**

4. मातुः द्वे नामनी लिखत । **1**

5. मातुलभार्यायाः द्वे नामनी लिखत । **1**

6. पत्युः पत्न्याः वा पितुः नाम किम् ? **1**

7. एकस्य प्रहरस्य अर्द्धभागं किं कथ्यते ? **1**

8. भद्रा तिथयः काः ? लिखन्तु । **1**

9. एकस्मिन् वर्षे कति मासाः भवन्ति ? **1**

10. भरणी नक्षत्रस्य चरणाक्षराणि लिखत । **1**

11. श्रीमदम्बिकादत्तव्यासस्य परिचयः लेख्यः । **2**

12. शिवराजविजयस्य काव्यगतसौष्ठवं स्पष्टयत । **2**

13. नीतिशतककर्तुः संक्षिप्त – परिचयः प्रदेयः । **2**

14. अधोलिखितस्य पद्यांशस्य भावार्थो लेख्यः – **2**

    दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।
    मणिना भूषितः सर्पः किमसौ न भयङ्करः ।।

15. मनुष्यस्य चत्वारि नामानि लेख्यानि । **2**

16. पञ्चाङ्गस्य का परिभाषा ? लिखत । **2**

17. रेखाङ्कितपदयोः अशुद्धिसंशोधनं कुरूत – **2**

    (i) रामः अश्वेन पतति ।

    (ii) कृष्णं दुग्धं रोचते ।

18. कस्यचिदेकस्य गद्यांशस्य सप्रसङ्ग – व्याख्या विधेया - **1 + 2 = 3**

(i) ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीप-प्रकाशेऽवतमस-वशादागन्तारं कमप्यनवलोकयन्, गम्भीरस्वरेणैववमवादीत् – "कः कोऽत्र भोः ?" इति । अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षेपमवोचत् – "क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः ?"

(ii) तद् यदि त्वं मां प्रविशन्तं न प्रतिरून्धेः तदधुनैव परिष्कृतं पारद-भस्म तुभ्यं दद्याम्, यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशत्संख्याकुलापरिमितं ताम्रं जाम्बूनदं विधातुं शक्नुयाः ।

19. दौवारिकं परीक्षितुं गौरसिंहः किं कृतवान् ? **3**

20. कस्यचिदेकस्य पद्यांशस्य सप्रसङ्ग व्याख्या विधेया । **1 + 2 = 3**

(i) विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता, युधि विक्रमः ।
यशसि चाऽभिरूचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

(ii) श्रोत्रं श्रुतेनैव न कुण्डलेन,
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां,
परौपकारैर्न तु चन्दनेन ।।

21. खल-सज्जनानां मैत्री कीदृशी भवति ? **3**

22. केषांचित् त्रयाणां वाक्यानां संस्कृतभाषायाम् अनुवादः करणीयः - **3 × 1 = 3**

(i) आचार ही परम धर्म है ।

(ii) संस्कृत भाषा सभी भाषाओं की जननी है ।

(iii) विद्यालय के चारों ओर वृक्ष हैं ।

(iv) बालक कान से बधिर है ।

(v) छात्र अध्यापक के साथ विद्यालय जाता है ।

23. कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या – **2 × 2 = 4**

(i) अश्वपत्यादिभ्यश्च

(ii) उत्सादिभ्योऽञ्

(iii) किति च

24. कयोश्चिद् द्वयोः सूत्रयोः व्याख्या कार्या – **2 × 2 = 4**

(i) वर्तमाने लट्

(ii) कर्तरि शप्

(iii) पूर्वोऽभ्यासः

25. कयोश्चिद् द्वयोः चत्वारः – चत्वारः पर्यायाः लेखनीयाः - **2 × 2 = 4**

(i) पुत्रः

(ii) नेत्रम्

(iii) कर्णः

26. कयोश्चिद् द्वयोः नामानि लेखनीयानि – **2 × 2 = 4**

(i) वारः

(ii) राशिः

(iii) ऋतवः

27. कमपि एकं विषयमवलम्ब्य निबन्धं (**150** शब्दैः) लिखत – **5**

(i) परोपकारः

(ii) मम प्रियः कविः

(iii) संस्कृतस्य महत्त्वम्

(iv) सत्सङ्गतिः

28. निम्नलिखितेषु केऽपि त्रयः प्रयोगाः साधनीयाः - **3 × 2 = 6**

दैत्यः, औत्सः, गार्ग्यः, वैनतेयः, दाधिकः ।

29. अधोलिखितेषु केऽपि त्रयः प्रयोगाः साधनीयाः - **3 × 2 = 6**

भवति, बभूव, अभवत्, भविष्यन्ति, भवामि ।

30. अधोलिखितेषु केऽपि चत्वारः प्रयोगाः साधनीयाः - **4 × 2 = 8**

गोता, पण्डितः, कुत्र, लघुतमः, पार्थिवः, बन्धुता ।

---